3 प्रहेलिकाः

A9A8Y6

एकचक्षुर्न काकोऽयं बिलमिच्छन्न पन्नगः।
क्षीयते वर्धते चैव न समुद्रो न चन्द्रमाः॥ १॥
चतुर्मुखो न च ब्रह्मा वृषारूढो न शङ्करः।
निर्जीवी च निराहारी अजस्रं धान्यभक्षणम्॥ २॥
अपदो दूरगामी च साक्षरो न च पण्डितः।
अमुखः स्फुटवक्ता च यो जानाति स पण्डितः॥ ३॥
पर्वताग्रे रथो याति भूमौ तिष्ठति सारथिः।
चलति वायुवेगेन पदमेकं न गच्छति॥ ४॥
सुवर्णस्य सुवर्णस्य सुवर्णस्य च जानकि।
प्रेषिता तव रामेण सुवर्णस्य च मुद्रिका॥ ५॥
भोजनान्ते च किं पेयं जयन्तः कस्य वै सुतः।
कथं विष्णुपदं प्रोक्तं तक्रं शक्रस्य दुर्लभम्॥ ६॥

टिप्पणी

चक्षुः આંખ **काकः** કાગડો **बिलम्** દર **पन्नगः** સાપ, નાગ **क्षीयते** ક્ષય પામે છે. **वर्धते** વધે છે. **चतुर्मुखः** ચાર મુખવાળો **अजस्रम्** સતત **वृषः** બળદ **तिष्ठति** ઊભો છે **मुद्रिका** વીંટી **पेयम्** પીવા લાયક, પીવા યોગ્ય **सुतः** પુત્ર **प्रोक्तम्** કહેવાયેલું **अपदः** પગવગરનો **तक्रम्** છાશ **शक्रः** ઇન્દ્ર **याति** જાય છે. **चक्षुर्न चक्षुः न, काकोऽयम् बिलमिच्छन्न कालः अयम् बिलम् इच्छन् न, चैव च एव, समुद्रो न समुद्रः न**

स्वाध्यायः

Y5D5W4

1. નીચેના શબ્દોનું શુદ્ધ ઉચ્ચારણ કરો :

(1) काकोऽयम् (2) पन्नगः (3) अजस्रम् (4) स्फुटवक्ता (5) पर्वताग्रे (6) भोजनान्ते

2. નીચેના પ્રશ્નોના જવાબ આપો :

(1) एकचक्षुः कः अस्ति ?

(2) कः धान्यभक्षणं करोति ?

(3) सारथिः कुत्र तिष्ठति ?

(4) रथः कुत्र याति ?

(5) रामेण का प्रेषिता ?

(6) जयन्तः कस्य पुत्रः ?

3. કૌંસમાંથી યોગ્ય શબ્દ પસંદ કરી ખાલી જગ્યા પૂરો :

(1) चतुर्मुखः _____ अस्ति। (ब्रह्मा, विष्णुः, शङ्करः)

(2) भोजनान्ते पेयं _____ । (दुग्धम्, सुपम्, तक्रम्)

(3) अपदः शब्दस्य अर्थः _____ । (सपादः, पादरहितः, पादः)

(4) रथः _____ चलति। (वायुवेगेन, जलवेगेन, विद्युत्वेगेन)

(5) विष्णुपदं _____ प्रोक्तम्। (सुलभम्, उन्नतम्, दुर्लभम्)

4. નીચેના શ્લોકો સુંદર અક્ષરોમાં લખો :

(1) भोजनान्ते _____ दुर्लभम्॥

(2) अपदो दूरगामी _____ पण्डितः॥

5. નીચે આપેલા ગુજરાતી શબ્દોને સંસ્કૃતમાં લખો :

(1) ભોજન બાદ (2) મુખ વિનાનો (3) એક ડગલું (4) વીંટી (5) દૂર જનાર (6) બળદ પર બેસનાર

6. અહીં આ એકમમાં વપરાયેલ સામાસિક શબ્દો આપ્યા છે, જેના આધારે અન્ય શબ્દો બનાવો :

(1) वृष ઉપરથી वृषारूढः। તો

अश्व _____ गज _____ वृक्ष _____

(2) पदम् ઉપરથી पदमेकम्। તો

शब्दम् _____ वाक्यम् _____ गीतम् _____

(3) भोजन ઉપરથી भोजनान्ते। તો

दिन _____ निशा _____ वर्षा _____

(4) पर्वत ઉપરથી पर्वताग्रे । તો

रथ _____ वृक्ष _____ कर _____

प्रवृत्ति :

(1) તમારા વિસ્તારમાં બોલાતી અન્ય પ્રહેલિકાઓ શોધીને લખો.

(2) નીરોગી રહેવા માટેના વિવિધ ભાષાનાં અને સ્થાનિક સુવાક્યો મેળવી તેનો સંગ્રહ કરો.

દા. ત. (1) અજીર્ણે ભોજનં વિષમ્

(2) આંખે ત્રિફળા, દાંતે લૂણ

પેટ ન ભરીએ ચારે ખૂણ.